॥ श्री गणेशाय नमः ॥

# अथ श्रीकृष्ण पंचोपचार पूजनम्

## ध्यानम्

**(हाथ में अक्षत, पुष्प, तुलसीदल लेकर ध्यान करें)**

**ॐ वंशीविभूषित करान्नवनीरदाभात् पीताम्बरादरुणबिम्बफलाधरोष्ठात् ।**
**पूर्णेन्दु सुन्दरमुखादरविन्द नेत्रात्कृष्णात्परं किमऽपि तत्वमहं न जाने ॥**

(ॐ भूर्भुवः स्वः श्री कृष्णाय नमः ध्यानं समर्पयामि)
(श्री कृष्ण जी के चरणों में अक्षत्, पुष्प, तुलसीदल चढ़ायें)

## चन्दनम्

**ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।**
**विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री कृष्णाय नमः चन्दनम् समर्पयामि)
(श्री कृष्ण जी के मस्तक में चन्दन लगायें)

## पुष्पम्

**ॐ माल्यादीनिसुगन्धीनि मालत्यादीनि वै प्रभो ।**
**मयाहृतानिपुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥**

ॐ भूर्भुवः स्वः श्री कृष्णय नमः पुष्पम् समर्पयामि
(कृष्ण जी के चरणों में पुष्प चढ़ायें)

## धूपम्

**ॐ वनस्पति रसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।**
**आघ्रेयः सर्व देवानां धूपोऽयं प्रतिगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री कृष्णाय नमः धूपम् आघ्रापयामि)
(श्री कृष्ण जी को धूप दिखायें)

## दीपम्

**ॐ साज्यं च वर्ति संयुक्तं बह्निना योजितं मया ।**
**दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥**

(ॐ भूर्भुवः स्वः श्री कृष्णाय नमः दीपं दर्शयामि)
(श्री कृष्ण जी को दीप दिखायें)

## नैवेद्यम्

**ॐ शर्कराखण्ड खाद्यानि दधिक्षीरघृतानि च ।**
**आहारंभक्ष्यभोज्यं च नैवेद्यं प्रतिगृह्यताम् ॥**

(ॐ भूर्भुवः स्वः श्री कृष्णाय नमः नैवेद्यम् निवेदयामि)
(एक पात्र में श्री कृष्ण जी के सामने भोग रखें तथा खाली पात्र में तीन बार जल छोड़ें)

## प्रार्थयेत्

**(हाथ में अक्षत, पुष्प, तुलसीदल लेकर प्रार्थना करें)**

**ॐ सच्चिदानन्दरूपाय विश्वोत्पत्त्यादिहेतवे ।**
**तापत्रय विनाशाय श्रीकृष्णाय वयं नुमः ॥**

(ॐ भूर्भुवः स्वः श्री कृष्णाय नमः प्रार्थना पूर्वकं नमस्कारान् समर्पयामि)
(श्री कृष्ण जी के चरणों में अक्षत्, पुष्प, तुलसीदल चढ़ायें)

**अनेन पंचोपचार पूजनेन श्री कृष्ण देवता प्रीयतां न मम ॥**

(श्री कृष्ण जी के चरणों में एक आचमनी जल चढ़ायें)

॥ इति शुभम् भवतु॥